यत्र त्वं च महाबाहो जातः कुलकरो भुवि ।
यादवानां महद्वंशमखिलं धारयिष्यसि ॥
तांश्चासुरान् समुत्पाट्य वंशं कृत्वात्मनो महत् ।
स्थापयिष्यसि मर्य्यादां नृणां तन्मे निशामय ॥
पुरा हि कश्यपो विष्णो ! वरुणस्य महात्मनः ।
जहार यज्ञिया गा वै पयोदाश्च महामखे ॥
अदितिः सुरभिश्चैव द्वे भार्य्ये कश्यपस्य तु ।
प्रदीयमाना गास्तास्तु नैच्छेतां वरुणस्य च ॥
ततो मां वरुणोऽभ्येत्य प्रणम्य शिरसा नतः ॥
उवाच भगवन् ! गावो गुरुणा मे हृता इति ॥
कृतकार्य्यो हि गास्तात ! नानुजानाति मे गुरुः ।
अन्ववर्त्तत भार्य्ये द्वे अदितिं सुरभिन्तथा ॥
मम ता ह्यक्षया गावो दिव्याः कामदुघाः प्रभो ! ।
चरन्ति सागरान् सर्व्वान् रक्षिताः स्वेन तेजसा ॥
कस्ता धर्षयितुं शक्तो मम गाः कश्यपादृते ।
अक्षयं याः क्षरन्त्यग्र्यं पयो देवामृतोपमम् ॥
प्रभुर्व्वा व्युत्थितो ब्रह्मन् गुरुर्व्वा यदि वेतरः ।
त्वया नियम्याः सर्व्वे वै त्वं हि नः परमा गतिः ॥
यदि प्रभवतां दण्डो लोके कार्य्यमजानताम् ।
न विद्यते लोकगुरो ! नासते लोकसेतवः ॥
यथा वास्तु तथा वास्तु कर्त्तव्यो भगवान् प्रभुः ।
मम गावः प्रदीयन्तां ततो गन्तास्मि सागरम् ॥
आत्मा मम हि ता गावो या गावः सत्त्वमव्ययम् ।
लोकानां त्वत्प्रवृत्तानामेकं गोब्राह्मणं स्मृतम् ॥
त्रातव्याः प्रथमं गावस्त्रातास्त्रायन्ति या द्विजान् ।
गोब्राह्मणपरित्राणात् परित्रातं जगत् भवेत् ।
इत्यम्बुपतिना प्रोक्तो वरुणेनाहमच्युत ! ।
गवां कारणतत्त्वज्ञः कश्यपे शापमुत्सृजम् ॥
येनांशेन हृता गावः कश्यपेन महात्मना ।
स तेनांशेन तु मर्त्त्ये गत्वा गोपत्वमेष्यति ॥
या च सा सुरभिर्नाम अदितिश्च सुरारणी ।
ते प्युभे तस्य भार्य्ये वै तेनैव सह यास्यतः ।
स ताभ्यां सह गोपत्वे कश्यपो भुवि रंस्यते ।
तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः ।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले ॥
गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः ।
तत्रासौ गोष्वभिरतः कंसस्य करदायकः ॥
तस्य भार्य्याद्वयञ्चैव अदितिः सुरभिस्तथा ।
देवकी रोहिणी चैव वसुदेवस्य धीमतः ॥
तत्रावतर लोकानां भवाय मधुसूदन ! ।
जयाशीर्व्वचनैस्त्वेते वर्द्धयन्ति दिवौकसः ।
आत्मानमात्मना हि त्वमवतार्य्य महीतले ।
देवकीं रोहिणीञ्चैव गर्भाभ्यां परितोषय” ॥)

क्षित्वा, [न्] पुं, (क्षि निवासगत्योः + “शीङ्क्रुशिरुहिजिक्षिधृष्भ्यः क्वनिप्” । उणां ४ । ११३ । इति क्वनिप् तुक् च ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

क्षिद्रः, पुं, (क्षिद + रक् ।) रोगः । सूर्य्यः । विषाणम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

क्षिप, य औ तुदि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-अनिट् ।) य, क्षिप्यति । औ, क्षेप्ता । इति दुर्गादासः ॥

क्षिप, श न औ तुदि । इति कविकल्पद्रुमः ॥ (तुदां-उभं-सकं-अनिट् ।) तुदि प्रेरणे । श न, क्षिपति क्षिपते शरं योधः । औ, क्षेप्ता । इति दुर्गादासः ॥

क्षिपः, पुं, (क्षिप् + “इगुपधज्ञाप्रीकिरः कः” । ३ । १ । १३५ । इति कः ।) क्षेप्ता । क्षेपणम् । इति व्याकरणम् ॥

क्षिपकः, पुं, (क्षिप् + कः ततः संज्ञायां कन् ।) योद्धा । इत्युणादिकोषः ॥

क्षिपका, स्त्री, (क्षिप् + कन् + टाप् अतो नेत्वम् । “न यासयोः” । ७ । ३ । ४५ । इत्यस्य वार्त्तिके “क्षिपकादीनाञ्च न” । इति कथनात् ।) क्षेपणम् । इति व्याकरणम् ॥

क्षिपणं, क्ली, (क्षिप् + ल्युट् भावे किञ्च ।) क्षेपणम् । तत्पर्य्यायः । क्षिपा २ । इति जटाधरः ॥

क्षिपणिः, पुं, (क्षिप्यते इति । क्षिप् + कर्म्मणि अनिः ।) अस्त्रम् । इत्युणादिकोषः ॥

क्षिपणिः, स्त्री, (क्षिप्यते असौ अनया वा । क्षिप् + कर्म्मणि करणे वा अनिः ।) क्षेपणी । नौकादण्डः । इत्यमरटीकायां भरतः ॥ जालविशेषः । मन्त्रः । अध्वर्युः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, ऋग्वेदे । ४ । ४१ । ४ ।
“उतस्य वाजी क्षिपणिं तुरण्यति
ग्रीवायां बद्धो अपिकक्ष आसनि” ॥)

क्षिपणी, स्त्री, (क्षिप् + अनिः ङीष् ।) क्षिपणिः । इत्यमरटीकायां भरतः ॥

क्षिपणुः, पुं, (क्षिपति इति । क्षिप् + “अनुङ् नदेश्च” । उणां ३ । ५२ । इति अनुङ् ।) वायुः । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे । ४ । ५८ । ६ ।
“सम्यक् स्रवन्ति सरितो न धेना
अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्म्मयो घृतस्य
मृगा इव क्षिपणोरीषमाणाः” ॥)

क्षिपण्युः, पुं, (क्षिप् + “कन्युच् क्षिपेश्च” । उणां ३ । ५१ । इति कन्युच् प्रत्ययः ।) वसन्तकालः । इत्युणादिकोषः ॥ देहः । सुरभौ त्रि । इति मेदिनी ॥

क्षिपा, स्त्री, (क्षिप् + “षिद्भिदादिभ्योऽङ्” । ३ । ३ । १०४ । इत्यङ् । ततष्टाप् ।) क्षेपणम् । इत्यमरः । ३ । २ । ११ । रात्रिः । इति तट्टीकायां भरतः ॥

क्षिप्तः, त्रि, (क्षिप् + कर्म्मणि क्तः ।) निक्षेपकृतवस्तु । त्यक्तः । तत्पर्य्यायः । मुक्तः २ नुन्नः ३ अस्तः ४ निष्ठ्यूतः ५ विद्धः ६ ईरितः ७ । इत्यमरः । ३ । १ । ८७ ।
(उद्गीर्णः । यथा, माघे । ३ । ७३ ।
“क्षिप्ता इवेन्दोः स रुचोऽधिवेलं
मुक्तावलीराकलयाञ्चकार” ॥
कर्त्तरि क्तः । पतितः । यथा, माघे १० । ७७ ।
“क्षिप्तमायतमदर्शयदुर्व्वी
काञ्चिदामजघनस्य महत्त्वम्” ॥
“रतेषु उर्व्वी क्षिप्तं पतितम्” । इति मल्लिनाथः ॥
हतः । यथा, माघे २ । ५३ ।
“केशरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः” ॥
अवज्ञातः । यथा, भागवते । २ । १८ । ४८ ।
“तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि” ॥
विक्षिप्तः । यथा, मार्कण्डेये । ८८ । १९ ।
“नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः” ॥)
वायुग्रस्तः । क्षेपा इति भाषा । इति लोकप्रसिद्धः ॥

क्षिप्ता, स्त्री, (क्षिप्त + टाप् ।) रात्रिः । इति हलायुधः ॥

क्षिप्नुः, त्रि, (क्षिप् + “त्रसिगृधिधृषिक्षिपेः क्नुः” । ३ । २ । १४० । इति क्नुप्रत्ययः ।) निराकरिष्णुः । निराकरणशीलः । इत्यमरः । ३ । १ । ३० ॥

क्षिप्रं, क्ली, (क्षिप् + “स्फायितञ्चिवञ्चीति” । उणां २ । १३ । इति रक् ।) शीघ्रम् । तद्युक्ते त्रि । इत्यमरः । १ । २ । ६८ ॥ (यथा, मनुः । ३ । १७९ । “विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि” ॥ मर्म्मविशेषः । यथा,—“तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं नाम मर्म्म तत्र विद्धस्याक्षेपकेण मरणम्” ॥ इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये ॥)

क्षिप्रपाकी, [न्] पुं, (क्षिप्रं पच्यतेऽनेन । क्षिप्रं पचति पाचयति वा । पच् + बाहुलकात् घिनुण् ।) गर्द्दभाण्डवृक्षः । इति रत्नमाला ॥ (ज्ञातव्या गर्द्दभाण्डशब्देऽस्य गुणपर्य्यायाः ॥) शीघ्रपाकविशिष्टे त्रि ॥

क्षिया, स्त्री, (क्षि क्षये + “षिद्भिदादिभ्योऽङ्” । ३ । ३ । १०४ । इत्यङ् । टाप् च ।) अपचयः । इत्यमरः । ३ । २ । ७ ॥

क्षिव, उ निरासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् उदित्वात् क्त्वावेट् ।) क्ष्णौ । निरास इह फुत्कारः इति भट्टमल्लः । मुखेन श्लेष्मादेर्वमनमिति केचित् । पृथक् पाठात् पूर्व्वो भ्वादिः । क्षेवति । उ, क्षेवित्वा क्ष्यूत्वा । इति दुर्गादासः ॥

क्षिव, य उ निरासे । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् । उदित्वात् क्त्वावेट्) क्ष्णौ । य, क्षीव्यति । उ, क्षेवित्वा क्ष्यूत्वा । इति दुर्गादासः ॥

क्षी, ञ हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-अनिट् ।) ञ, क्षयति क्षयते । इति दुर्गादासः ॥

क्षीज, हिक्कने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) दीर्घी । हिक्कनमव्यक्तशब्दः । सखेदस्यैवाव्यक्तशब्दे क्षीजेः प्रयोगः । इति रक्षितः । क्षीजति सखेदो जनः । इति दुर्गादासः ॥

क्षीजनं, क्ली, (क्षीज् + भावे ल्युट् ।) कीचकानां नादः । इति हेमचन्द्रः ॥

क्षीणः, त्रि, (क्षि + क्तः । “निष्ठायामण्यदर्थे” । ६ । ४ । ६० । इति दीर्घः । “क्षियो दीर्घात्” । ८ । २ । ४६ । इति निष्ठातस्य नः ।) सूक्ष्मः । अबलः । तत्पर्य्यायः । दुर्ब्बलः २ कृशः ३ क्षामः ४ तनुः ५ छातः ६ तलिनः ७ अमांसः ८ पेलवः ९ । इति हेमचन्द्रः ॥ (यथा, गीतायाम् ९ । २१ ।